Shri Raghunath Temple MSS. Library,
JAMMU

No. २०५४

Title शक्ति तत्व विमर्शिनी व्याख्या
१ मांश पर्यन्ता

Author श्री नीलकण्ठः

Extent १० Age ∝

Subject वेदान्त शास्त्रं

© Dharmartha Trust JK. Digitized by eGangotri

शान्तितत्त्वविमर्शिनी व्याख्या प्रथमांशपर्यंता

२०५४

© Dharmartha Trust JK. Digitized by eGangotri

© Dharmartha Trust JK. Digitized by eGangotri

ॐ श्रीगणेशाय नमः ॐ जिज्ञासायां यस्य सङ्कौ श्रुतिरपि विमला यस्य निःश्वासरूपा यस्माद्भूतान्यभूवन्
श्रुतिरपि सकला यस्य रूपे समाप्ता यच्छक्तिर्लोककर्त्री स्थितिविलयकरी भाति मज्ज्ञानरूपा चेद्रूपो
न्नैव भिन्ना न भवति स शिवः पातु देव्या समेतः १ नेत्रोत्थवह्निकणदग्धतनुं स्मरेषु नेत्रैस्त्रीवपद
योतमनंगरूपम् या पोषयन्निजवरेण शिवोपि तद्धुः सा शार्वपट्टमहिषी मम सौख्यदा स्यात् २
नमस्कृत्य महामायां निर्मितायाः स्वयं किल शक्तितत्त्वविमर्शिन्याख्या व्याकुर्वे शिवप्रदाम् ३ त
देतावत्सहैव सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियते
इत्यादिश्रुतिसिद्धं यज्जगत्कारणमस्ति तस्य काचन निखिलजगदण्डखण्डबुद्बुदकरेव जलधिस्था
नीया सकलविदविद्यपञ्चमहाविभूतिरूपा महासंविदानन्दसमा देशकालादिपरिच्छेदशून्या स्वा
भाविकी परा शक्तिर्न तस्य कार्यं करणं च विद्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबल
क्रिया चेति मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् मायया मुह्यमान इत्यादिश्रुतिसिद्धा सर्वो
त्तमा विजयते तन्तं तु शास्त्रं तस्य विमर्शनावबोधकं ग्रन्थं कुर्वन्मङ्गलमाचरन् कर्तव्यार्थं प्रकटयति ॥
नत्वेति नत्वा श्रीशंकराचार्यचरणांभोरुहद्वयम् श्रीलक्ष्मीमान् रंगनाथाख्योऽपि तरंगहम् १ उ

© Dharmartha Trust JK. Digitized by eGangotri

मामहेश्वरेण नास्त्यपीः शैवोपनामकः नीलकंठः प्रकुरुते शाक्तितत्त्वविमर्शिनीम् २ अस्यार्थः
स्पष्ट एव ३ ततः परं ग्रंथप्रतिपाद्यं शाक्तितत्त्वं वर्णयति सदसदसत्सदिति सदसदसत्सदितिप्र
तिभाप्रतिभानकारिणीं शंभोः जायादयांविदध्यादघटितघटनापटीयसी माया ३ अस्या
र्थः यत्सत्तदसत् यदसत्तत्सदिति या प्रतिभा भ्रमात्मकं ज्ञानं तस्याः प्रतिभानं साक्षिज्ञानेन त।
स्य कारिणी जननयित्री किं चाघटितस्यासंभावितस्य याघटनारचना तस्यां पटीयसी प्रतिकुश
ला या माया लोकप्रसिद्धा सा शंभोर्जायादयां विदध्यादेनाहंरूपा मायाया अनुग्रहेण सर्वेसेत्सती
ति भावः अयं भावः जगति कार्यत्वज्ञानेन स्वतरां तत्कारणं किं विदस्तीत्यनुमीयते क्षित्यंकुरादि
षु कृष्टत्वानच्चकारणं न सांख्यमतसिद्धं प्रधानं वितमर्हति देहेंद्रियमहीधरादिरूपस्य विचित्रप्रति
नियतसंनिवेशविशेषस्य जगतो रचनायामचेतनस्य प्रधानस्य योग्यतासंभवात् लोके प्रति
नियतकार्यस्य विचित्रप्रासादादेरतिदृढिमस्फटिकतोपलंभात् शास्त्रांतावदयं रचनात।
त्सिध्यर्थं प्रकृतिरपि नाचेतनस्योपपद्यते तेनानधिष्ठिते शाकटादौ तददर्शनात् अथ पुरुषस्य
चेतनस्य प्रकृत्यधिष्ठानत्वमभ्युपगम्यते तत्रासंगत्वं पुरुषस्य हीयेतेत्यप्रसिद्धतापत्तिः ननु संसा

© Dharmartha Trust JK. Digitized by eGangotri

प्रा॰त॰
२

रेहत्वेदुःखमोहात्मकत्वमुपलभ्य तदात्मकं प्रधानं जगत्करोतीति चेन्न सुखादीनामांतरत्वात् घ
टादीनां च बाह्यत्वात् तस्मान्न प्रधानं जगद्धेतुः नापि परमाणवः ते हि प्रलीने पूर्वसिद्धे जगति यदा महे
श्वरस्य सिसृक्षा भवति तदा प्राण्येकमेव प्रणाश्वि स्थलेषु परमाणुषु आद्यं कर्मोत्पद्यते तस्मात्कर्मणः
एकः परमाणुः परमाण्वंतरेण संयुज्यते तस्मात्संयोगाद्व्यणुकमारभ्यते तेभ्यस्त्रिभ्यो द्व्यणुके
भ्यस्त्र्यणुकमित्यादिक्रमेण कृत्स्नं जगदुत्पत्तौ बाधकाभावात्ते युक्ताः परमाणवो ननयेती
ति वक्तव्यं तदेपि न संभवति यदेमदाद्यं कर्म तदनिमित्तं सनिमित्तं वा अनिमित्तत्वे नियामकाभा
वात्सर्वदा तदुत्पत्तौ प्रलयाभावप्रसंगः सनिमित्तत्वेपि तन्निमित्तं दृष्टमदृष्टं वा न तावद्दृष्टं प्रयत्न
साभिघातस्य वा शरीरोत्पत्तेः प्रागसंभवादीश्वरप्रयत्नस्य च नित्यस्य कादाचित्कामाद्यकर्मोत्प
नियामकत्वात् नाप्यदृष्टमाद्यकर्मनिमित्तमात्मसमवेतस्यादृष्टस्य परमाणुभिरसंबंधात् अतए
वमादिदोषप्रसरे सत्याद्यकर्मासंभवान्न परमाणुसंयोगो जायते ततः संयुक्तेभ्यः परमाणु
भ्यो जगज्जनिर्न हि तत्संभवतीति न परमाणवः कारणम् तथा बौद्धमतेपि जगदुत्पादनं नि
र्वाहो न संभवति तेषां मतमित्थं द्वौ समुदायौ आंतरो बाह्यश्चेति बाह्यो भूनदीसमुद्रादिकः २

आभ्यन्तरश्चित्तचैत्यात्मकः तदेतत्समुदायद्वयमेवाश्रित्येदं जगत् तत्र बाह्यसमुदायस्य परमाण
वश्चतुर्विधाः केचित्खराः पार्थिवाख्याः अपरे स्निग्धा आप्याख्याः अन्ये चोष्णास्तैजसाख्याः अ
न्ये चलनात्मका वायवीयाः तेभ्यश्चतुर्विधेभ्यः परमाणुभ्यो युगपत्पुंजीभूतेभ्यो बाह्यसमुदायो।
जायते आंतरस्य समुदायस्य स्कंधपंचकं कारणम् रूपस्कंधो विज्ञानस्कंधो वेदनास्कंधः
संज्ञास्कंधः संस्कारस्कंधश्चेति तत्र चित्तेन निरूप्यमाणाः शब्दस्पर्शादयो रूपस्कंधः तदभि
व्यक्तिर्विज्ञानस्कंधः तज्जन्यः सुखदुःखवेदनास्कंधः देवदत्तादिनामधेयं संज्ञास्कंधः एते
षां वासना संस्कारस्कंधः तेभ्यः पंचस्कंधेभ्यः पुंजीभूतेभ्य आंतरसमुदायोत्पत्तिः तस्मा
द्दृश्यते समुदायद्वयमिति तत्र ब्रूमः किमणूनां चैतन्यजातोत्पत्तौ निमित्तं भवेत् तच्चेतनोऽन्यो।
स्ति किं वा स्वयमेव संहन्यते आद्ये स चेतनः स्थायी क्षणिको वा स्थायित्वेऽपसिद्धांतः क्ष
णिकत्वे स्वयमलब्धात्मकः पश्चात्तज्जातोत्पत्तिं करोतीति वक्तुमशक्यो द्वितीये चेतनाः
स्कंधा अणवश्च नियामकचेतनमंतरेण प्रतिनियताकारेण कथं संहन्येरन् तस्माद्द्वयमयुक्तं बौ
द्धमते अपरे बौद्धाः बाह्यार्थमपलपंतो विज्ञानमात्रं तत्त्वमालंबनमित्याहुः तत्रात्रव्यवहा

© Dharmartha Trust JK. Digitized by eGangotri

षु॰त॰
३

रान्नुपपत्तिः स्वप्नेवाप्यपदार्थाननपेक्ष्य केवलया बुध्द्या व्यवहारदर्शनात् तथैव जगद्व्यवहारस्या
प्युपपत्तेस्तस्माद्विज्ञानस्कंधमात्रं तत्त्वमस्तीति वदंति तत्र भ्रमो विषमो हि स्वप्नदृष्टांतः प्रबोधदशा
यां स्वप्नस्य बाध्यमानतया जाग्रद्व्यवहारस्य नक्वचिद्बाधं पश्यामः नच बाह्यार्थसद्भावे प्रमाणा
भावः उपलब्धेरेव प्रमाणत्वात् उपलभ्यंते हि घटादयो बहिःस्थितेन अथोच्येत बुद्धिरेव बाह्यस्य
टादिवदवभासत इति एवं तर्हि बुद्धिरेव बाह्यार्थसद्भावे प्रमाणमिति ब्रूमः कश्चिदपि बा
ह्यार्थाभावे तद्बुद्ध्युत्पत्तिराहित्यात् बहिर्बुद्धित्वक्तिर्न संगते तस्माद्बाह्यार्थसद्भावान्न विज्ञा
नमात्रत्वं युक्तमिति तथापरे आर्हता मन्यते जीवोऽजीवश्चेति द्वौ पदार्थौ जीवश्चेतनः श
रीरमात्रपरिमाणः सावयवः अजीवः षड्विधः तत्र महीधरादिरेकः आस्रवसंवरनिर्जर
बंधमोक्षाख्याः पंच आस्रवत्यनेन जीवो विषयेष्विति आस्रवः इंद्रियसंघातः संवृणोति विवेक
मित्यविवेकादिः संवरः निःशेषेण जीर्यत्यनेन कामक्रोधादिरिति केशालुंचनतप्तशिला
रोहणादिकं तपो निर्जरः कर्माष्टकेनापादिता जन्ममरणपरंपराबंधः चत्वारि घातिकर्मा।
णि पापविशेषरूपाणि चत्वारि चाघातिकर्माणि पुण्यविशेषरूपाणि शास्त्रोक्तोपायेन तेभ्यो ३

© Dharmartha Trust JK. Digitized by eGangotri

ष्टभ्यः कर्मभ्यो विनिर्गतस्य जीवस्य सततोर्ध्वगमनं मोक्षः तएते सप्तपदार्थाः सप्तभंगीरूपेण न्यायेन व्यवस्थाप्यं
ते स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यश्च स्यादस्ति
च नास्ति चावक्तव्यश्चेति सप्तभंगीन्यायः अस्यायमर्थः स्याच्छब्द ईषदर्थवाची निपातः प्रतिवादिनो हि चतुर्वि
धाः सद्वादिनोऽसद्वादिनः सदसद्वादिनोऽनिर्वचनीयवादिनश्चेति पुनरप्यनिर्वचनीयमतेनामिश्रितानि
सदसद्वादिमतानीति त्रिविधा वादिनः तानेतान् सप्तविधवादिनः प्रति सप्तविधा न्यायाः प्रयोक्तव्याः
यथा सद्वादी समागत्याह त्वं प्रति त्वन्मते मोक्षोऽस्तीति पृच्छति तत्राहं ब्रूमः स्यादस्ति ईषदस्तीति एवमसद्वादि
नः स्यान्नास्तीत्यादीन्युदाहरणान्युदाहर्तव्यानि तावता वादिनः सर्वे निर्विण्णाः सन्तो नोत्तरं प्रतिपद्यन्ते अतो
ऽस्य सप्तभंगीरूपस्य न्यायस्य सद्भावाज्जीवादीनां सप्तपदार्थानां सिद्धौ किमाश्चर्यमिति तत्र ब्रूमः सप्तभंगीरू
पोऽयमपन्यायः एकस्य जीवपदार्थस्य सद्वादिनं प्रति सद्रूपत्वम् असद्वादिनं प्रत्यसद्रूपं चेत्येवमादिविरु
द्धधर्मप्रतिपादकत्वात् न च जीवस्य सावयवत्वं युज्यते अनित्यत्वप्रसंगात् तदनित्यत्वे च मोक्षः कस्य पुरुषार्थः
स्यात् तस्मान्न्यायाभासेन सप्तभंग्याख्येन जीवादिपदार्थानां न सिद्धिरिति तथा तार्किककाणादशैवादयः
केवलं निमित्तमीश्वरस्य मन्यन्ते युक्तिं चाहुः यथा कुलालोऽनुपादानभूतो दंडचक्रादीनि निमित्तत्वेन कर्ता
भवति तथा तदस्य ईश्वर इति तत्र ब्रूमो न युक्तं केवलं निमित्तत्वे वैषम्यनैर्घृण्यदोषस्य दुष्परिहरत्वात् क
थं तर्हि तया परिह्रियते दोष इति चेत् प्राणिकर्मसापेक्षत्वादिति ब्रूमः तथा तत्रैवागमोऽस्माकं प्रमाणं तथाप्य

© Dharmartha Trust JK. Digitized by eGangotri

ततो गत्वागमश्चेदंगीक्रियते तदाजवस्य पतमीश्वरस्य परित्याज्यं स्यात्वक्तस्यां अजायेयेत्युपादानत्वस्याविरोधा
त्तस्मान्नयुक्तमलं दृश्येश्वरवाद इति तथा पांचरात्रा भागवता मन्यंते अस्ति भगवानेको वासुदेवो जगत उपा
दानं निमित्तं च तत्समाराधनध्यानज्ञानैर्भवबंधच्छेदः तस्माद्वासुदेवात्संकर्षणाख्यो जीवो जायते जीवा
त्प्रद्युम्नाख्यं मनो मनसश्चानिरुद्धाख्योऽहंकारः त एते वासुदेवादयश्चत्वारो व्यूहाः सर्वात्मकाः इति
तत्र ब्रूमो जीव उत्पद्यत इत्युक्तं तदसत् कृतनाशाकृताभ्यागमप्रसंगात् तस्माज्जीवस्योत्पत्तिमत्वं न युक्त
मिति स्पष्टं चेदमुत्तरमीमांसायां रचनानुपपत्तेश्च नानुमानमित्यारभ्य उत्पत्त्यसंभवादित्यंतैरधिकरणैर्द्विती
याध्याये तदेवं रीत्या सर्वेषां मतेषु निखिलदोषरहितं जगदुत्पादनक्षमं बंधमोक्षव्यवस्थापकं कारण
मनुमानसिद्धं न संभवति ततः सकलदोषसन्निपातेपि यत्कार्यकरणक्षमं तादृशं लोकदृष्टांतसिद्धं
कारणं सर्ववादिसंमतमनुमानेन कल्पनीयं तच्चास्ति सर्वेषां वादिनामूर्च्छामायावमते स्वप्नेंद्रजालगंध
र्वनगरसर्पभ्रमाद्यनुभवः वदंति च तत्र सर्वे कथमहो विना कारणमिदमुत्पन्नं तस्मादस्ति काचन वि
लक्षणा माया तयेदमुत्पादितमिति तत्र लोके सकलदोषसन्निपातेपि विचित्रकार्यकरणक्षमा।
माया प्रसिद्धा सैवानुमानेनानुमातव्या तथा च प्रयोगः इदं जगन्मायाजन्यं दृश्यत्वात् स्वप्नेंद्रजाल
गंधर्वनगरसर्पभ्रमादिवदिति तथा च सकलजगत्कारणं मायाशक्तिरूपं निर्दुष्टं सर्वैरभ्युपगं।
तव्यं तथा च सौरपुराणे नासद्रूपा न सद्रूपा माया नैवोभयात्मिका सदसद्भ्यामनिर्वाच्या मिथ्या

© Dharmartha Trust JK. Digitized by eGangotri

भूतात्मना तनोतीति शिवः प्रतिबिंबरूपेण मायायामुत्पद्यत इति मायायाः शिवजायात्वं तथा च श्रुतिः सा जा
या जाया भवति यदस्यां जायते पुनरिति ननु तत्रापि सांख्यनीत्या विद्यातो ऽप्यवस्तुना वंध्यायोगात् वस्तुत्वे सि
द्धांतहानिः विजातीयद्वैतापातिश्च विरुद्धोभयरूपा चेत् तादृक्पदार्थाप्रतीतेरित्यादिस्तर्हि दोषोद्भा
वनं क्रियत एवेति चेन्न ते दोषा मायायां संभवति किं तर्ह्यलंकारा एव मायायां सर्वसंभव इति न्यायात्
किंच न वयं केवलमनुमानेन मायां साधयामः किं तर्हि श्रुतिप्रसिद्धस्यानुभवैः तथा च श्रुतयः मा
यां तु प्रकृतिं विद्यादजामेकां लोहितशुक्लरूपां तच्छेनाभ्यपिहितं यदासीत्परास्य शक्तिर्विविधैव
श्रूयते इत्याद्याः शिवसूत्रेपि चैतन्यमात्मा ज्ञानं बंध इति सूत्रद्वयमिदमेव कारणभूतं शक्तित
त्वं प्रदर्शितं व्याख्यातं चैतत् व्याख्यातृभिः परमेश्वरेण स्वस्वातंत्र्यशक्त्याभासितस्वरूपगोपनारू
पया महामायाशक्त्या स्वात्मनाकाशकल्पेप्यनाश्रितात्मप्रस्फुटितमायामात्रैतत्तः संकोचोवभासि
तइति तथा शक्तिसूत्रेपि चितिः स्वतंत्रा विश्वसिद्धिहेतुरिति सूत्रेतस्य व्याख्या विश्वस्य सदा
शिवादेर्भूम्यंतस्य सिद्धौ निष्पत्तौ प्रकाशने स्थित्यात्मनि परप्रमातृविश्रांत्यात्मनि संहारे च परा
शक्तिरूपा चितिरेव भगवती स्वतंत्रा अनुत्तरविमर्शमयी शिवभट्टारकाभिन्ना हेतुः कारणमस्या
हि प्रसरंत्यां जगदुन्मिषति व्यवतिष्ठते निवृत्तप्रसरायां च निमिषतीति स्वानुभव एव साक्षीति तथा
नंदिकेश्वरकृतकाशिकायाम् अइउण् सूत्रव्याख्यायाम् अकारः सर्ववर्णाग्र्यः प्रकाशः परमः

© Dharmartha Trust JK. Digitized by eGangotri

शिवः चित्कलामिं समाश्रित्य जगद्रूपउ एणीश्वर इति अकारवाच्यः शिवः इकारवाच्यां चित्कलां मा
यामाश्रित्य उ व्यापको जगद्रूपेण आसीदित्यर्थः तस्माच्छ्रुतियुक्त्यनुभवैर्मायायाः कारणत्वं सिद्ध
स्यादेतत् एतस्याः सदसत्त्वातिभाषत्तिभानकारित्वं कथमिति चेदुच्यते प्रथमतस्तावद्रज्ज्ञानेनावृ
तां रज्जुं सामान्येदमाकारेण पश्यति तत्तस्मिन्ज्ञाने सर्वरूपविक्षेपरूपेण विद्यापरिणमते त
माविषयकं सर्पसाक्षी स्वहृत्यापश्यतीति तथा ब्रह्मणः सद्रूपे आवृतज्ञानानेदायं श्रोहमिति गच्छ।
ति तस्योहंमौज्ञाने जगदाकारविक्षेपरूपेण विद्यापरिणमते तां साक्षीपश्यतीति तेन सदसत्त्वद्ध।
त्वमिति अस्य जगत्सद्रूपवतीबोध्यं अथास्या अघटितघटनापटीयस्त्वं स्पष्टमेव प्रतीयते य
थाद्वैते तत्त्वे द्वैतभावः अलौकिकब्रह्मणोपि सदृशाचिदाभासकल्पने सर्वदोषसन्निपातेपिना
नाविधजगद्रचनम् अत्यल्पदर्पणेपि बहुयोजननगरकल्पने नानाविधकार्यकारणभाव
कल्पने तस्य व्यभिचारस्य क्षणकाले युगबुद्धिः युगे क्षणबुद्धिः वितस्तिमात्रे देशेनेकयोजनदेशक
ल्पने केवलमनसा नानाविधस्वप्नप्रकल्पने सूक्ष्मवटादिबीजेषु वृक्षरूपोजननशक्तसद्भावः नानावि
धादृशान्नानाविधचमत्कारः इन्द्रजालेनानौषधि संयोगेन नानाविधपदार्थोत्पत्तिः सर्वपदा
र्थानां क्षणमात्रेणोपगोपनं सर्वजगतः स्वाभेदेन स्थापनं पुनस्तस्यैवानिःसारणं ब्रह्मणो जीव
भावेन बंधकल्पनं तस्य मोक्षकल्पनं चेत्येवमाद्यघटनामायायाः योगवासिष्ठादिग्रंथेषु स्पष्टं प्रति

© Dharmartha Trust JK. Digitized by eGangotri

पादिता एतस्मात्किमिदं ज्ञातुमपरं यद्दुर्भवास्मास्थितं रेतनिहस्तमस्तकपद्मोद्भूतनानोत्करम् प
र्यायेण श्रीमत्त्रयोवनजरावैधैर्यनेकैर्हीनपशुपतत्वमिति श्रुत्वेति जिज्ञासितया गच्छतीति स्तुतिरपि हृद्येवि
स्तृणि र्यत आवभूव यदि वा दध्ये यदि वा न यो अस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि वा न वेदेति
तदेतत्सर्वं मनसि निधाय देवी प्रति शिववाक्यं श्रीमत्कदर्शने अनेककोटिब्रह्माण्डरचनाव्याप्तता
पि च निर्वाणानामसि देवेशि सहायोपि न कश्चन अनेकजीवकर्माणि तत्कालकृतानि च कथं
जानासि देवेशि कीदृशं ज्ञानं तवाम्बिके कथं जगत्किमर्थं तत्करोषि केन हेतुना नाहं जानामि तत्त्वे
वि यतोहं द्विजङ्गुद्भवः तदभिप्रायवेत्तारो न वेदा नैव पण्डिताः तदुत्पत्तिपरिज्ञानाज्जानीमस्तत्कथं त
प्रिये यन्नोहं तव द्विपुः संगाच्छिन्नबोधस्तत्प्रसादनः शिवत्वं मम सर्वस्वं वर्ण्यते किमतः परं यद्यत्करो
षि तद्भूयात्त्रकरोषि न तद्भवेत् सर्वं करोषि स्वाधारं तथापि न हनोषि वै भवनेश्वरि ते सर्वं चानयं
वेदकः प्रमाता यथा यथा तां प्रपश्यामि च मकारं तथा तथा नवं नवं प्रपश्यामि तव पि सर्वं चमत्कृतो
स्मि पाङ्कलेषे बद्धे स्वेच्छया मोचयस्यपि स्वतन्त्रा सर्वकार्येषु महामायेत्वमेव हि निर्गुणः प
रमात्मा तदाश्रयतया स्थितः तस्य भट्टारिका स्थितं भवनेश्वरि भोगदेति स्तुतिरपि हे तस्य
म जगतां त्रिगुणापि दोषैर्न त्रायसे हरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूत
तमव्याकृताहि परमा प्रकृतिस्त्वमाद्येति इत्थं महामायास्वरूपं वर्णयित्वा सर्वं जगत्तन्मयमेव

© Dharmartha Trust JK. Digitized by eGangotri

ग्र·त·
६
6

त्याह मायामयं समस्तमिति मायामयं समस्तं व्यस्तं ब्रह्माण्डभाण्डमखिलं हि सा मायाजयति तरां य।
स्या रूपं न शक्नोति वक्तुम् यतः सर्वकारणभूता माया ततस्तस्याः सकाशाज्जातं कार्यजातं समस्तं
मस्तं समष्टीश्वररूपं व्यस्तं व्यष्टिजीवरूपं तथा पंचभूतात्मकमखिलं ब्रह्माण्डभाण्डं ब्रह्माण्डपात्रं मा
यामयमेव वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति न्यायात् मृद्घटशरावमणिकुंडला
दिवत् मायामयमेव यतो मायामयं ततः सैव माया जयति तराम् ननु केयं विलक्षणा किं तस्या
रूपमस्तीति चेत्तत्राह यस्या रूपं वक्तुं न शक्नोति दुर्ज्ञेयमस्या रूपमस्तीति भावः अयं भावः मा
याप्रतिबिंब ईश्वरोऽविद्याप्रतिबिंबो जीव इति पक्षे प्रतिबिंबरूपेण मायायाः परिणतत्वाज्जीवेश्व
ररूपिणी मायैव भवति अथ च्छेदपक्षेऽपि तदवच्छेदस्य मायाकल्पितत्वान्मायामयावेव जीवे
श्वरौ तदुक्तं मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव
हीति ननु तच्छेदनाभ्यां विहितं यदासीदिति श्रुतौ तच्छब्दस्य ब्रह्मेति तत्त्वमेव हेतुर्मायामात्रमिति
श्रुतावनिर्वचनीयत्वं निर्वचनीयत्वस्य विश्वे सत्यमित्यादिश्रुत्या च सत्यत्वस्य प्रतिपादनाद्वक्तुं न शक्
नोति कुत इति चेन्न त्रिविधस्यात्मनो येनैकस्यापि रूपस्यातिचेतुमशक्यत्वात् ननु तच्छब्दरूपेण
जगत्स्थितेः कथं संभवतीति चेन्न तच्छेदनाभ्यां विहितं यदासीत्तपसस्तन्महिनाजायतैकं त
च्छब्दमिदं रूपमस्यास्तु अभिव्यंजिका नित्यविद्यमाना विमूढधीरात्मैव दृष्टा समस्तमसत्त्वेन दर्शयति ६

© Dharmartha Trust JK. Digitized by eGangotri

सिद्धत्वासिद्धत्वाभ्यां स्वतंत्रत्वेनेति तापनीयश्रुत्यनुरोधेन जगत्कारणसमर्थस्यैव तत्त्वस्यो । १
ङ्गीकारात् तथा च स्मृतिः यस्याः स्वरूपमतुलं भगवाननंतो ब्रह्मा हरश्च न हि वक्तुमलं ब-
लं चेति इयं मायास्वरूपेण तत्प्रभावं च वर्णयित्वा सा माया चिद्रूपाद्भिन्ना वाभिन्ना वेति शंका ।
यामाह साभिन्ना चिद्रूपादिति साभिन्ना चिद्रूपा चिद्रूपेण तया विनाभूतम् उक्त भुजिदाहक-
तेव प्रभा रवौ विधौ यथा ज्योत्स्ना न हि शक्तिः शक्तस्वरूपात्पृथगवतिष्ठते न च शक्तोऽपि श-
क्तिस्वरूपात्पृथगवतिष्ठते लोके क्वापि दर्शनायात एवं तस्मान्मायाशक्तेः शक्तिमतो ब्रह्मण-
श्चाविनाभाव एव तदुक्तं शक्तिदर्शने शक्तिश्च शक्तिमद्रूपाद्व्यतिरेकं न वांछति तादात्म्यम-
नयोर्नित्यं वन्हिदाहिकयोरिवेति इहोक्तार्थः स्पष्ट एव ननु अस्याः शक्तेर्मायारूपाया एवं जगत्का-
रणत्वे यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुत्याप्र- ६
तिपादितस्य ब्रह्मणो जगत्कारणत्वस्य विरोध इत्यत आह उभयं मिलितं कारणमिति उभ-
यं मिलितं कारणमेकैकस्यास्तिन्नेव कारणता एकैककारणत्वे तत्परं गच्छेद्द्विहायतेकृत्वेवि ६
भवेदियमाशंका यदि कदाचित्क्वचिच्छक्तिशक्तिमतोः पृथग्भावः स्यात् न च तदास्ति वन्हि-
दाहकतयोरिव तयोस्तादात्म्यस्यैव सत्वात् अन्यथा शक्तित्वशक्तिमत्वयोर्व्याघातः तत एव स्मात्त-
स्मादुभयं शक्तिशिवात्मकं मिलितमेव कारणं नैकैकस्य शक्तेः शिवस्य वा कारणता भवति

© Dharmartha Trust JK. Digitized by eGangotri

प्र॰त॰
७

असंभवात् असंभवमुपपादयति एकस्येति कस्यचित् कारणत्वे अपरः कारणतानवच्छिन्नः तत्कारणताव
च्छिन्नं विहायान्यकार्यं गच्छेत्तर्हि तत्सत्ताविरहितं गमनेऽप्यलमस्तीत्यर्थः अयं भावः तर्हि सा व्योमवत् सिद्धा यथा
नयोर्माया शक्तिः परमात्मनः पृथक् पृथक् तास्ति एकमेवाद्वितीयमिति सत्यवाक्यस्यात्मपदोपरिष्टात्सप
वसर्वत्रेति श्रुत्या सर्वत्र परमात्मनः सत्तेन तदाश्रितायास्तच्छक्तेर्मायायास्तदभेदेनैव विद्यमानत्वात्सा
च्छक्तेः कारणत्वेन तद्दूरे शक्तिमानागत एव तथा शक्तिमतः कारणतायां तद्दूरे शक्तिरप्यागतैवे।
तियुक्तमुभयं कारणमिति स्यात्तद्विशेषः शक्तेः कारणता परिणामिता यावब्रह्मणस्तु विवर्ततयेति ६
भंगं तरेणाशिवशक्त्योः पृथग्भावं वर्णयति मौलिच्छायामिति मौलिच्छायां स्वपदालंघितमी
हेत्यत्र शेनं पिधाय गणवान् पादस्थानेन शिरो मौलिस्थानेन पादसंचारः ७ स्वपदा स्वशिरश्छायोल्लंघनं क
दापि न भवति तथा शिवशक्त्योः पृथग्भावो न भवतीति भावः शाक्तेराकर्षणे शिवस्याकर्षणे शिवस्याक
र्षणे शक्तेराकर्षणं जायत एवेत्यभिप्रायेण त्रिशिरोभैरवेऽप्युक्तं स्वपदा स्वशिरश्छायां यद्वल्लंघितुमीह
ते पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कलेति ७ ननु मोहदपूर्णया मायोच्छेदो जायत इति तस्मा
त्युक्तभावः कथं नास्तीत्युच्यत इति चेत्तत्राह सर्वस्येति सर्वस्यापह्नवे मपि मुक्तौ तिष्ठत्युमा महामाया
दृष्टेऽदृष्टे नाप्यशेनास्तीत्येवं वदन्ति निगमागमाः ८ मुक्तौ सर्वद्वैतरूपस्य सर्वस्य हरणेऽपि यावद्ब्रह्मविषया
सर्वस्य हरणे क्रियते मायायाश्च परमात्मनोऽद्वैतज्ञान शक्तिः उमाभिधा महामाया सा तत्र तिष्ठत्येव किं ७

© Dharmartha Trust JK. Digitized by eGangotri

तत्र प्रमाणमिति चेन्न त्वाहद्रष्टुः परमात्मनो दृष्टेस्तानस्य नाशो नास्तीति निगमाद्याः श्रुतिस्तत्त्वयोर्वदंति
कंठरवेणेत्यर्थः तथा च बृहदारण्यके मैत्रेयीब्राह्मणे न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशि-
त्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति मार्कंडेयपुराणे नित्यैव सा जगन्मूर्तिरिति देवी-
भागवतेऽष्टमीयस्कंधे माया नित्या कारणं च सर्वेषां सर्वदा किल कर्मबीजमतो नित्यं चिंतनीयं सदा बु-
धैरिति श्रृणु राम सदा नित्या शक्तिराद्या सनातनीति पुरुषश्चेति विद्ध्यनादी उभावपीति भगवद्गीता-
यां श्रीशंकराचार्यभगवत्पादा अपि प्रपंचसारे प्रकृतिः पुरुषश्चेति नित्यौ कालश्च सत्तमेति अयं भावः एकैकशः
क्तिरंतर्मुखतया चिल्लसंती शिवतत्त्वरूपिणी सैव विद्या बहिर्मुखतया विलसंती अविद्यातत्त्वरूपिणी
तदुपाधिकः शिवः एव जीव इति प्रपंचसारव्याख्यायां श्रीपद्मपादाचार्याः शैवसिद्धांतमाकुलतंत्रीता अविद्या-
नाशेऽपि विद्यायाः स्थितत्वात्र मुक्तौ मायोच्छेद इति मायाया नित्यत्वमबाधमेव ननु तर्हि बद्धमुक्ताव-
स्थयोः को भेद इति चेदंतर्मुखत्वबहिर्मुखत्वावस्थाभेदेनेति ब्रूमः ननु विद्यानाशवदविद्यायानाशः कुतो ना-
स्तीति चेत्तस्य नाशः केन कर्तव्यः विद्यातत्त्वेन तस्या अपमन्ये न तस्या अपमन्ये नेत्यनवस्था अथाविद्या-
या नाशः स्वेदोपसंहारत्यायेन भवतीति चेन्न स्वेदोपसंहदयोः परस्परं वैरभावः स्थित इति परस्परं हननं सं-
भवति न तत्राविद्याविद्ययोः परस्परं वैरभावः अज्ञानेन ज्ञानविरोधि किं तज्ज्ञानमेवाज्ञानविरोधीति लो-
कप्रसिद्धेः न च कतककरजोन्यायेनोभे अपि नश्यत इति वाच्यं तद्ध उभयोरपि कल्पितत्वात्तत्रैवस्थानापत्तेः य

© Dharmartha Trust JK. Digitized by eGangotri

शा॰त॰
८

यथा कृतककरनसो जलमलसहितस्य मलापोवस्थानं तस्मादविद्यानाशापि न्नात्येवानर्थत्वाविद्यानिवृत्तीति
सोऽप्रतं नचाविद्यानाशेऽस्तेति सोऽभावो विद्यानाशापेक्ष्यतीति वाच्यं केवलस्याभावस्य सत्तोरूपस्यान्य।
नाशकत्वायोगात् ननु तर्हि साविद्या पुनरुत्पत्तमेव जीवं पुनरुत्पत्त्यापयेदिति चेन्न कर्माभावात् सर्वकर्मणां
नाशस्य जातत्वात् कर्मभोगार्थं हि सृष्टिकत्स्नं तदभावे हि सृष्टेरप्यभावः तदुक्तं देवीभागवते कर्मबीज
मतो नित्यं चिंतनीयं सदा बुधैरिति अत एव मैत्रेयीब्राह्मणे मुक्तो ज्ञानं नास्तीति याज्ञवल्क्यवाक्यं मैत्रेयी
श्रुत्वाति भीता तां प्रति मन्दिरवदत् ज्ञानमस्त्येव किन्तु द्वितीयविषयाभावात् ज्ञानं नास्तीवेत्युपचर्यतेत
त्रत्यमिदं वाक्यं नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं यत्प
श्येदिति ज्ञानसद्भाववाक्यशेषं गच्छते नच मुक्तो न तस्य तेषु नरुत्पत्यानं स्यादिति चेन्न यथा बौद्धमते बुद्धे।
विसदृशप्रवाहः संसारः सदृशप्रवाहो मोक्षः इति मोक्षे सदृशप्रवाहरूपेणैव बुद्धिस्थितिः तत् न जाति
तथैवात्रापि दग्धबीजवत् चरमवृत्तिरंतर्मुखैव निरंतरं तिष्ठति न बहिर्मुखा भवतीति स्वीकारात् नच चर
मवृत्तेर्नित्यत्वस्वीकारे अद्वैतश्रुतिविरोधः जगन्नित्यत्वेपि जगतो मिथ्यात्वेन यथा वेदांतिभिरद्वैतश्रुति वि
रोधो वाध्यते तथैवात्रापि स्वीकारात् जगति चरमवृत्तौ वाविद्याजन्यत्वेनानिर्वचनीयत्वस्य समत्वात् अत
एव स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि इति श्रुतौ महिमा शब्दोदितपराशक्तो परमेश्वरस्यावस्थानमु
क्तं संगच्छते तदुक्तं प्रातिरदर्शने मुक्तावन्तर्मुखैव तं भवने अवतिष्ठतीति ८ अथ प्रकारांतरेणापि मा ८

© Dharmartha Trust JK. Digitized by eGangotri

यायानित्यत्वेमुक्तौवर्णयति नाशस्वरूपमर्शेनाशेनिर्वक्तुमास्तियोग्योन तद्रूपेणापि ध्रुवानित्यत्वाश्रा
क्तामहामाया ५ नाशस्वरूपमशेषे अविद्यायानाशस्वरूपविचारेक्रियमाणेसति सनाशोनिवृत्तिर्निर्वक्तुंयोग्या
नभवतिपंचमप्रकारस्येवानिर्वचनीयनाशस्यावार्यैरभिहितत्वात् अतोऽनिर्वचनीयनाशस्वरूपेणापि
महामायानित्याभवतीत्यर्थः अयंभावः चरमवृत्तिरूपयाविद्ययाअविद्यानाश्यतेसनाशः किमविद्या
निवृत्तिरूपश्चेत्रिवृत्तायाअविद्यायाःस्थलोत्तरेविद्यमानायानित्यत्वमभ्याहृतमेव ध्वंसरूपश्चेद्घटादि
ध्वंसस्यस्वावयवेषुकपालेष्विवदर्शनादविद्यावयवेष्वेवसध्वंसःस्यात्सतीतितद्रूपेणानित्यत्वमेव लयरू
पोनाशश्चेल्लयस्यस्वकारणएवदर्शनात्तद्रूपेणापिनित्यत्वमेव ननुआत्मनोमैवाविद्यानिवृत्तिः साच
नसती अद्वैतहानेः नाप्यसती ज्ञानसाध्यत्वायोगात् नापिसदसद्रूपाविरोधात् नाप्यनिर्वाच्या अनिर्वा
च्यस्यसादेरज्ञानोपादानकत्वनियमेनमुक्तावपितद्रुपादानाज्ञानानुवृत्त्यापत्तेः ज्ञाननिवर्त्यत्वापत्ते
श्च किंतर्हि पंचमप्रकारचतुष्टयोत्तीर्णापंचमप्रकारैतिश्रीमानंदबोधाचार्यमतोक्तरीत्यातद्रूपोविद्यानाशो।
स्त्विति चेन्न तद्रूपेणापिनित्यत्वस्याकस्मिकत्वाद्भावाभावरूपयोरपिमायामयत्वात्तस्मात्मोनमा
स्यायंतत्रापितेनरूपेणनित्यत्वमभ्याहृतमेवेति इदंचमुक्तस्यचितिमात्ररूपेणावस्थानमितिचितित
न्मात्रेण तदात्मकत्वादितिऔडुलोमिरित्यधिकरणसिद्धांतोक्तमतेन तथाप्येवमप्युपन्यासात्पूर्वभावा
दविरोधंबादरायणइत्यधिकरणसिद्धांतोक्तबादरायणमतेनोक्तं मुक्तस्यैश्वरभावापत्तिरितिब्राह्मेण

© Dharmartha Trust JK. Digitized by eGangotri

भु.न.
५
9

जैमिनिरूपन्यासादिभ्य इत्यधिकरणे सिद्धं तोक्तं जैमिनिमते तन्मुक्तस्येश्वरभावे मायाया नित्यत्वमलंत
मेव येन विंबभूत ईश्वरः प्रतिविंबरूपो जीव इति वदंति तेषामपि मते प्रतिबिंबरूपस्य जीवस्य नाशे बिं
बस्येश्वरस्यावस्थानमिति मायाया नित्यत्वमेव ननु सर्वजीवमुक्तौ ईश्वरस्यापि नाशो भविष्यतीति चे
कनीयमहत्प्रलये प्रमाणाभावात् एतावत्पर्यंतमनंतकालस्यातिक्रांतत्वेपि यदा सर्वजीवानां तन्मु।
क्तिस्तदागामिकालेमुक्तिर्भविष्यतीति काशंका तस्मान्तत्वेपि मायाया नित्यत्वमेव ९ अथ प्रकारां
तरेणापि मायाया नित्यत्वमुपपादयति पादोस्येति पादोस्य सर्वभूतान्येभ्यो भिन्नं त्रिपाद्भूतैपोक्तं तत्रा।
पि तत्त्रिपान्निकोवारपि तेस्यात्समर्थ इहलोके १० अस्यार्थस्य हृपत अयंभावः पादोस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवीति श्रुत्युक्तरीत्या सर्वाणि ब्रह्मांडानि एकःपादः तस्मादधिकमनंतं त्रिपाद्ब्रह्मवर्तते
तथा च मायाशक्तिः सर्वं यत्र व्याप्य ब्रह्म व्याप्यैव तिष्ठति अग्निशक्त्यादौ तथादर्शनात् तत्समष्ट्यादिशक्तिः क्व
चिदेकदेशे स्थितेति हृष्टं किं तु व्याप्यैव तथा च ब्रह्मांडांतर्गतमाया जन्यतन्मुक्तौ तन्नाशेपि त्रिपाद्ब्रह्म।
गता शक्तिरस्त्येवेति तस्या नाशःकेनकर्तव्यः न च तत्रांतःकरणाद्युत्पत्तिरस्ति येन नाशो भवेत् तस्मात्सर्व
प्रकारेण माया भगवती नित्यैवेति स्थितम् १· तदेवं प्रकारेण मायाया नित्यत्वे सिद्धे तस्या उपासनाप्रका
रं वक्तुं तस्याः श्रुतितंत्रप्रसिद्धानि कानि चिन्नामान्याह त्रिगुणेति त्रिगुणा प्रकृतिः शक्तिर्माया बीजं गुह्यो ५
वरं प्राणः बिंदुर्विमर्शावत्तरमव्यक्तं चेति संज्ञाः स्युः ११ एताः संज्ञाः स्युरितोकः स्मिन्नस्य लेडको स्लदये

© Dharmartha Trust JK. Digitized by eGangotri

दर्शयिष्यामः ११ यान्येवेति यान्येवैतानि नामान्येतान्येव तत्तदीयमंत्रस्य तस्मान्मायाबीजं प्रधानमंत्रो म ६०
हेशान्याः १२ अर्थः स्पष्ट एव अयं भावः ब्रह्मणः सर्वात्मकत्वेपि ब्रह्म सच्चिदानंद परमव्योम निर्गुणमित्या
दयो ब्रह्मणो मुख्याः संज्ञा अन्यास्तु शिवविष्णुब्रह्मादिसंज्ञास्तत्तदुपाधिद्वारेण तथा ब्रह्मणः सर्वमं
त्रात्मकत्वेपि ब्रह्मणो मुख्यो मंत्रः प्रणव एव अन्ये मंत्रास्तु तत्तदुपाधिविशिष्टब्रह्मणो वाचकाः अत एव
सर्वत्र मुख्यब्रह्मनामभिरेव प्रणवो व्यवह्रियते तथा मायायाः सर्वात्मकत्वेपि त्रिगुणा प्रकृतिः शा
क्तिर्मायेत्यादयो मायाया मुख्याः संज्ञाः अन्यास्तु पार्वती लक्ष्मी सरस्वतीत्यादयस्तत्तदुपाधिद्वारे
ण तथा मायायाः सर्वमंत्रात्मकत्वेपि मायाया मुख्यो मंत्रो मायाबीजमेव अन्ये मंत्रास्तु तत्तदुपाधिवि
शिष्टमायाया वाचकाः अत एव सर्वत्र मुख्यमायानामभिरेव मायाबीजं व्यवह्रियते तदेतदागमविदो
स्पष्टं १३ यस्मादेवं तस्मात्तु कला विद्याः कामराज लोपामुद्रा प्रभृतयो मुख्यत्वेन श्रीभुवनेश्वरी
मंत्रं मायाबीजमेव सर्वभावेन वर्णयंतीत्याह एतद्रहस्यमिति एतद्रहस्यमखिलं ललितास्वेनैव
मंत्रतो वक्ति सकलपदं जीवपरं मायापरमस्ति शक्तिबीजं तु १४ एतन्मंत्रस्य मायाबीजस्य रहस्यं माहा
त्म्यं ललिता देवी शिवभट्टारिका स्वेन स्वात्मरूपेण स्वकीयमंत्रेण वक्ति कथमिति चेत्तस्मिंल्ललि
तामंत्रे तृतीयकूटे यत्सकलपदं तत्सर्वपरं सर्वस्य वस्तुजातस्य वाचकमस्ति शक्तिबीजं तु मायाबी
जं तु मायाया एव वाचकमस्ति तथा च सर्वं मायामयमेवास्तीत्यर्थः यत एवं प्रकारेण सर्वप्रमाणमूर्ध
न्यश्रीललितामंत्रेण मायाबीजमाहात्म्यं वर्ण्यते तत एतन्माहात्म्यवर्णनेन ततोऽन्यत्र मायावर्णा के

© Dharmartha Trust JK. Digitized by eGangotri

शं॰ त॰ १०

10

नास्तिनापेक्षितं चेतिभावः तदुक्तं तंत्रराजे ललितायास्त्रिभिर्वर्णैः सकलार्थोभिधीयते शेषे
णदेवीरूपेणतेनसादिदमीरितं अशेषलोकजगत्कृत्स्नब्रह्मेत्यात्मकमीश्वरीति शक्तिदर्शने
चमायैवपरमाविद्यापंचकृत्यात्मिकापरा मयाशिवेयतेनित्यंतत्प्रसादादहंप्रभुः अस्त्रमंत्रस्त
णशान्तं निस्तत्त्वं यस्तनाहतं स्वरास्वरमुनीन्द्रैश्च महतंतत्प्रसादतः इत्थंलोमात्रशेषस्तनशिष्यो
नगुरुर्भवेत् सर्वलोकगुरुःसाक्षाच्छिवएवनसंशयइति १३ अधुनाप्रणवमायाबीजमंत्रद्वयं
शिवशक्त्योर्मिलितयोर्वाचकमस्तीत्याह उभयोरिति उभयोरभिन्नभावान्मायातारद्वयवाचका
दुभयोः वन्हौहोमःशक्तौहोमश्चवन्हिगोचरस्तत् १४ उभयोःशिवशक्त्योरभिन्नभावादभेदादेतौ
मंत्रौप्रणवमायाबीजाख्यौ उभयोःशिवशक्त्योर्वाचकौ प्रणवोब्रह्मवाचकोपिशक्तिवाचकः
शक्तिबीजंशक्तेर्वाचकमपिब्रह्मवाचकंतयोरभेदात् तत्रदृष्टान्तोयथावन्हेःकृतोहोमस्तच्छ
क्तौकृतएवतथावन्हिशक्तौकृतोहोमोवन्हौकृतएवभवतितद्वदित्यर्थः तदुक्तंप्रपंचसारे।
श्रीमदाचार्यैःतदातांतारमित्याहुरोमात्मेतिवकृभूताः तामेवशक्तिंब्रुवतेह्रेमात्मेतिचापरे
इति ह्रेमात्मेत्यत्रहकाररेफयोरकारस्योच्चारणार्थत्वेनतत्त्यागे ह्रींबीजंसिद्धं अथैतन्माया
बीजमंत्रमहिमाप्रज्ञाप्यानादिकंचश्रीमच्छंकराचार्यभगवत्पादैःप्रपंचसारतंत्रेविस्तरेणोप
पादितं ततएवावधार्यं इतिश्रीशैवोपनामकरंगभट्टसूनुलक्ष्मीगर्भजनीलकण्ठविरचितायां १०
शक्तितत्त्वविमर्शिनीव्याख्यायांप्रथमोंशः समाप्तः इतिशिवं ॥

© Dharmartha Trust JK. Digitized by eGangotri